Barcode : 99999990010977
Title - triennial catalogue of manuscripts vol.10b
Author - t.chandrasekharan
Language - sanskrit
Pages - 317
Publication Year - 1952
Barcode EAN.UCC-13


GOVERNMENT OF INDIA
DEPARTMENT OF ARCHAEOLOGY
CENTRAL ARCHAEOLOGICAL LIBRARY

7869

CLASS 091.4912/G.O.M.L.M

CALL No. ~~091.492 G.O.M.L.M~~

D.G.A. 79.

A TRIENNIAL CATALOGUE OF MANUSCRIPTS

COLLECTED
DURING THE TRIENNIUM
1937-38 TO 1939-40

FOR THE

GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS

BY

. CHANDRASEKHARAN, M.A., L.T.
Curator, Government Oriental Manuscripts Library, Madras
and the staff of the Library.

(*Prepared under the orders of the Government of Madras*)

382

VOLUME X—Sanskrit—B

091.4912
G.O.M.L.M.

PRINTED BY THE SUPERINTENDENT
GOVERNMENT PRESS
MADRAS
1952

CENTRAL ARCHAEOLOGICAL
382
7/8/53
891.2001/Cha.

CENTRAL ARCHAEOLOGICAL
LIBRARY NEW DELHI.
Acc. No. 7869
Date. 12.11.56
Call No. 891.4212/Cha.M.L.H.

INTRODUCTION

The second part of the tenth volume of the Triennial Catalogue of Sanskrit manuscripts for the triennium 1937–1938 to 1939–1940 is prepared on the same line as that of the first part of this volume. This part consists of manuscripts transcribed from the injured manuscripts collected during 1937–1938 and manuscripts acquired during 1938–1939 numbering (R. 6497–7000). Attention is drawn below to a few of the important works described in this volume.

R. 6499 TRIPURAVIJAYA CAMPŪḤ
R. 6832 KUŚAKUMUDVATĪYAM BY ATITRĀTRAYĀJIN.

The former is a work written in Campū style describing the victory of Lord Śiva and the destruction of the three demons who were ruling over three towns, called Tripura. It is known from the last stanza of this work that the composition of the present work was finished in 1608 A.D.

The latter is a drama in five acts dealing with the story of the marriage of Kuśa, son of Śri Rāma, with Kumudvatī, a Nāga princess. The author wrote this work in the middle of the 17th century and this drama is believed to have been enacted in the presence of Nīlakaṇṭha Dīkṣita at Madura.

The author of these two works is one Atirātrayājin, the great grandson of Āccān Dīkṣita the brother of the famous, Appaya Dīkṣita. He is the younger brother of the famous Nīlakaṇṭha Dīkṣita.

R. 6502 BRAMASŪTRABHĀṢYA VYĀKHYĀ BY PARĀṄKUŚAYATĪ.

This is a commentary on Śribhāṣya of Śrī Rāmānujācārya by Parāṅkuśayati. The commentator says in his introductory verses that he wrote this commentary called

Vākyārthadīpikā so that every one can understand easily the meaning of Śrībhāṣya. It would be very useful if a complete copy of this work is found elsewhere.

R. 6510. VIRŪPĀKṢA CAMPŪḤ.

A treatise in verse and prose style dealing with the greatness and holiness of Vidyānagar or Vijayanagar which is famous not only for its historical importance but also for the sanctity of Sri Virūpākṣa temple situated therein. Vidyāraṇya, after whose name the city is called Vidyānagar. Pampā river, Kiṣkindhā hills, Lord Raṅganātha and some kings who ruled Vijayanagar are all mentioned here. It mainly describes the car festival of Lord Virūpākṣa or Pampāpati. The author of this work is not known.

R. 6521. PARAMĀDVAITAPARIBHĀṢĀ BY UPANIṢADBRAHMAYOGIN.

This is an epitome of various views regarding the Paramādvaita doctrine by Upaniṣadbrahmayogin, a disciple of Sri Vāsudeva. It explains various technical terms used in Paramādvaita siddhānta.

R. 6615. KAUMĀRYĀDYUTSAVAPRATIṢṬHĀVIDHI.

This is a treatise on the process of sanctifying the image of Bhadrakāli, Hariharaputra, etc., for worshiping in a temple. The extracts have been taken from various Śaivāgamas like Kāraṇāgama, Kāmikāgama, etc. This work deals with six subjects.

R. 6629. MADĀLASĀKUVALAYĀŚVAM BY KṚṢṆAKAVI.

A Nāṭikā in five acts representing the marriage of Madālasā with Kuvalayāśva, son of Satrujit by Kavībhasimha Kṛṣṇakavi, the second son of Dāsārya of Hārīta family and Veṅkamāmbā of Jamadagni family. He was patronised by Kṛṣṇabhūpāla of Liṅgarāta family who ruled over Mysore. The author says that he has written a

commentary on Kṛṣṇaprabhāvodaya of Śrīnivāsasārvabhauma. This drama was intended to be staged on the occasion of Dasara festival.

R. 6635 SARVAMATOPANYĀSA SIDDHĀNTA DĪPIKĀ R. 6635-A. ŚAIVASIDDHĀNTA DĪPIKĀ BY SARVĀTMA ŚAMBHU.

The first work is a summary of the accepted tenets of the various philosophical systems of thought by Sarvātmaśambhu, a disciple of Aghorācārya.

The second is an expository work on various doctrines in Śaivasiddhānta by the same author.

R. 6738 VASUCARITRAM.

A drama in five acts representing the love and marriage of Kanakalekhā with Vasurāja. It is not known whether this work is based on the famous Vasucaritram of Rāmarājabhūṣaṇam or the Campu of Kālahasti called Vasucarita.

R. 6801 RĀGHAVĀBHYUDAYA WITH COMMENTARY BY GOMAṬHA ŚRĪNIVĀSĀCĀRYA.

This is a Kāvya describing the story of Rāmāyaṇa. It breaks off in the 4th Kāṇḍa. As the stanzas of this poem afford illustrations of Śabdālaṅkāras, the commentary is very helpful to understand the differnent meanings therein.

R. 6804. KṚṢṆAVILĀSAM OF PUṆYAKOṬI WITH COMMENTARY.

A poem describing the story of the tenth skandha of Bhāgavata by Srī Puṇyakoṭi, with a commentary, the author of which is not known. Puṇyakoṭi is a disciple of Bodhānandaghanendrayogi and Veṅkaṭeśa. This Kṛṣṇavilāsa kāvya is different from the Kṛṣṇavilāsa kāyva of Śri Sukumārakavi and Gurūsvayambhurāma. Vide Nos. R. 85 (*c*) and R. 2088.

R. 6805. ŚRUTGĪTĀ KĀVYAM WITH COMMENTARY.

A philosophical poem about Advaita Vedānta based on Śrutigītā. The stanzas of the Śrutigītā are quoted. There is also a commentary on it ; but the name of the commentator is not known.

R. 6833. ŚAṄKARAVIJAYA BY VYĀSĀCALA.

This is a kävya in 12 sargas narrating the leading incidents of the Śaṅkarabhagavatpāda. Vyāsācala or Vyāsagiri is the author of this work. He is quoted by Ānantānandagiri.

R. 6867. HARIŚCANDRA CAMPŪḤ BY NĀRĀYAṆA.

This is a work in verse and prose describing the leading incidents in the life of Hariścandra, the famous king of Solar race. The author is one Nārāyānā, son of Mokṣaguṇḍa Veṅkaṭārya and Kṛṣṇāmbā It breaks off in the 3rd Vilāsa. This is said to have been written on the Vijayadaśamī day of one Pingala year.

R.6989. CANDRĀLOKA WITH A COMMENTARY OF NṚSIMHA

A commentary on Candrāloka written by Nṛsimha. He says that he wrote this commentary after studying the ancient as well as modern work on Rhetorics. Hence, this would be very useful to the readers of Candrāloka.

T. CHANDRASEKHARAN,
Curator.

GOVERNMENT ORIENTAL MANUSCRIPTS
LIBRARY, MADRAS-5.
Dated 4th May 1952.

CONTENTS

SUBJECT INDEX

Volume X-B

AUTHOR INDEX

Volume X-B.

GENERAL INDEX

[Note.—The names printed in italics are those of the works described.]

A TRIENNIAL CATALOGUE OF MANUSCRIPTS

1937–38 to 1939–40

VOLUME X-B

PART I—SANSKRIT.

R. No. 6497

Paper. 11½ × 9½ inches. Foll. 132. Lines, 20 on a page. Devanagari. Good. Extent, 3,250 granthas.

Restored in 1937–38 from R. No. 5792.

न्यायबिन्दुः by वैद्यनाथभट्टः ।

NYĀYABINDUḤ by Vaidyanāthabhaṭṭa.

Contains up to the end of 10th sūtra of the 4th pāda of the 12th Adhyāya.

Beginning :

वन्दे जैमिनिमाचार्यं शबरस्वामिनं तथा ।

कुमारिलश्च तच्छिष्यान् न्यायबिन्दुर्विधीयते ॥

सू—अथातो धर्मजिज्ञासा ॥

स्वाध्यायोऽध्येतव्य इति वि . . . . . जिज्ञासा येन स्वर्गार्थत्वाद्रात्रिसत्रन्यायेनाप . . . पुनर्मृत्युञ्जयति इत्यार्थवादिकमृत्युजयार्थत्वाद्यागर्थस्याभावान्तराभावात्तदनन्तरं . . . . चिन्तितव्यमिति प्राप्ते—

अर्थज्ञानरूपदृष्टफले सम्भवत्यदृष्टकल्पनायोगात् ज्ञानस्य च विचारं विनासम्भवात् . . . . मावर्त्तितव्यमिति सिद्धान्तः ।

Colophon :

इति न्यायबिन्दौ प्रथमाध्यायस्य प्रथम पादः ।

Colophon :

इति श्रीरामचन्द्रात्मजवैद्यनाथभट्टकृते श्रीन्यायबिन्दौ एकादशस्याध्यायस्य चतुर्थः पादः ।

End :

अ· ११ पा-४-अधि. ६. सू १०.

सू—द्रव्यविकारं पूर्ववदर्थकर्म स्यात्तथा विकल्पे नियमप्रधानत्वात्

(R. Nos. 6498 and 6499 one volume.)

R. No. 6498

Paper. 11½ × 9½ inches. Foll. 105. Lines, 20 on a page. Devanagari. Good.

Transcribed in 1937–38 from a manuscript of Dr. Nāgarajaśarma of Kumbakonam.

रामायणव्याख्या by सत्यधर्मयतिः ।

RĀMĀYAṆAVYĀKHYĀ by Satyadharmayati.

Fol. 1 to 76*b*. Extent, 1,900 granthas.

The other work herein is Tripura Vijaya Campūḥ. Fol. 77*a*.

Contains 1 to 75 Sargas of Āraṇya Kāṇḍa.

A commentary on Vālmiki Rāmāyaṇa by Satyadharmayati a disciple of Satyavaraśrīpāda.

Beginning :

आत्मवान् प्रशस्तचित्तः । दण्डकारण्यं शुकशापादरण्यभूतं दण्डकस्य राज्ञो देशः । तथैवोत्तरकाण्डे वक्ष्यमाणत्वात् । दुर्धर्षः द्विषद्भिः । दुर्धर्षमिति पाठे दण्डकारण्यविशेषणम् । मण्डलं समूहम् ॥ २ ॥

Colophon :

। इत्यारण्यकाण्डे प्रथमः सर्गः ।

End :

नानाविद्यानामपि पृथक्पृथगनेकत्वं द्योतयितुमनेकनानाविधेत्युक्तिः ।

Colophon :

। इत्यारण्यकाण्डव्याख्यायां परमहंसेत्यादिविरुदाङ्कित सत्यवरश्रीपादशिष्य सत्यधर्मयतिकृतायां पञ्चसप्ततितमः सर्गः समाप्तः ।

R. No. 6499

Transcribed in 1937–38 from a manuscript of P. P. Subrahmanya Sastry, Professor, Presidency College, Madras.

त्रिपुरविजयचम्पूः by अतिरात्रयाजिन् ।

TRIPURAVIJAYA CAMPŪḤ by Atirātrayājin.

Foll. 77 to 105. Extent, 800 granthas.

Begins on fol. 77*a* of the MS. described under R. No. 6498.

Complete in 5 Āśvāsas.

A work in verse and prose, viz., campū kāvya style describing the victory of Śiva, the hero of this work and the destruction of the three demons who were ruling over three towns called Tripura. It is by Atirātrayāji, one of five sons of Nārāyaṇa Dīkṣita and the grandson of Āccā Dīkṣita who is the younger brother of Appaya Dīkṣita. The author is known as the younger brother of Nīlakaṇṭha Dīkṣita who presided over while Kuśakumudvatīya, one of the other works of this author, was enacted at Madura. It is known from the last stanza of this MS. that the composition of this work was finished in 1608 A.D.

Beginning :

मौर्वीमूर्ध्नि शरश्शरासनशिरस्सञ्चारि चक्रद्वयम्
चक्रान्तर्निहितश्शरस्तदुदरे सूतस्तदास्ये हयः ।
तेषामेव शिरस्पदेषु वसतिः स्वस्येति यस्य श्रुतं
देवश्चित्रपरिच्छदस्स दिशतु श्रेयांसि भूयांसि नः ॥

अपि च

चक्रीभूते शशाङ्के परिणमति तथा मण्डले चण्डभानोः
काले कस्मिन् विधातः कथय पुरहरस्त्रीण्यधाक्षीत् पुराणि ।
इत्थं स्कन्देन पृष्टे विमृशति सुचिरं ध्यानमास्थाय धात
र्यानन्दोद्भिन्नमन्दस्मितमवे · · · मुखं सुन्दरं चन्द्रमौलेः ।

कर्णाभ्यर्णनिविष्टमुष्टिसुदृढव्याकृष्टसर्पेश्वरं
ज्यानम्रामरशैलमौलिनिपतद्दिक्पालपर्यष्टकम् ।
अव्याद्विश्वमकाण्डसंकुवलयत्क्रूरप्रकारानल-
ज्वालान्तःकबलीकृतासुरपुरं घोरं पुरारेः स्मितम् ॥

श्रेयसां यदुपादानमपदानं पुरद्रुहः ।
चम्पूं करोमि तदिदमम्ब वाणि प्रसीद मे ॥
आस्ते तत्फलमादिमं भगवतश्शंभोः प्रसादो महान्
(यच्चास्य) [अस्यान्यच्च] हि नान्तरीयकतया सिद्ध्येत्
प्रबन्धस्य नः ।
दोषः किश्चन लेशतः कुहचिदप्यन्विच्छतः (प्य)स्विद्यतो
दृश्यं यन्मलिनं खलस्य वदनं मात्सर्यतः शीर्यतः ॥
यन्नारायणदीक्षितेन्द्रतनुभूसाधारणं घुष्यते
यच्च श्रीयुतनीलकण्ठमखिनः सोदर्यतालक्षणम् ।
विद्वांसस्तदिदं समस्तमधुना श्रीकण्ठदासस्य मे
लक्ष्यन्तामतिरात्रयाजिन इतः पाण्डित्यमत्यद्भुतम् ॥

Colophon :

इति भरद्वाजकुलजलधिकौस्तुभे श्रीमदद्वैतविद्याचार्यश्रीकण्ठमतनिर्वाह-धूर्वहचतुरधिकशतप्रबन्धनिर्मित्यलङ्कर्मीण श्रीमदप्पय्यदीक्षितसोदर्य श्रीमदाच्चा-दीक्षितपौत्रस्य श्रीनारायणदीक्षितात्मजस्य श्रीमदतिरात्रयाजिनः कृतिषु त्रिपुरविजयनाम्नि चम्पूकाव्ये मुकुन्दस्य संदर्शनं नाम प्रथमाश्वासः ।

End :

त्रिपुरविजयाभिधाना चम्पूरियं शाम्भवप्रसादेन ।
नलशुकशकाब्दजाता प्राप्नोत्वाचन्द्रार्कं प्रचयम् ॥

Colophon :

इति त्रिपुरविजयचम्पूकाव्ये पञ्चमाश्वासः समाप्तः ।

(R. Nos. 6500 and 6501, one volume.)

Paper. 11⅓ × 9½ inches. Foll. 238. Lines, 20 on a page. Devanagari. Good.

Restored in 1937–38 from D. No. 17148 and the folio herein have been written in one side.

R. No. 6500

रामायणसारसंग्रहः by ईश्वरदीक्षितः ।

RĀMĀYAṆSĀRASAṄGRAHAḤ by Īśvaradīkṣita.

Foll. 1 to 18. Extent, 300 granthas.

Incomplete.

The other work herein is Rāmāyaṇa Vyākhyā **Amṛtakatakam, fol. 19a.**

Contains Bālakāṇḍa only.

R. No. 6501

Restored in 1937–38 from a library MS. R. No. 4685.

रामायणव्याख्या—अमृतकतक ।

RĀMĀYAṆA VYĀKHYĀ—AMṚTAKATAKA.

Foll. 19*a* to 238. Extent, 5,500 granthas.

Begins on fol. 19*a* of the MS. described under R. No. 6500.

Contains Āraṇya and Kiṣkindhā Kāṇḍas only.

Fol. 238*b* is left blank.

R. No. 6502

Palm leaf. 17¼ and 17⅛ × 1¼ and 1⅜ inches. Foll. 166. Lines, 5 to 7 on a page. Grantha. Much injured. Extent, 4,400 granthas.

Purchased in 1938–39 from Śri S. Kṛṣṇaswami Ayyangar of Timmavaram, Accharappakkam P.O., Tindivanam.

ब्रह्मसूत्रभाष्यव्याख्या वाक्यार्थदीपिका by पराङ्कुशयतिः ।

BRAHMASŪTRABHĀṢYAVYĀKHYĀ VĀKYĀRTHADĪPĪKĀ by Parāṅkuśayati.

Incomplete.

A commentary on the Śrībhāṣya of Rāmānujācārya by Parāṅkuśayathi.

Beginning :

श्रीपराङ्कुशयोगीन्द्रः श्रीभाष्यार्थप्रकाशिकाम्
सुग्रहामकरोच्छ्रीमान्यस्तस्मै विदधे नमः ॥

श्रीवासरम्यजामातृमुनिपादाब्जसंश्रयः ।
पराङ्कुशमुनिश्चक्रे भाष्यवाक्यप्रकाशिकाम् ॥

. . . . काञ्चिनाशेषपोषं
शमितनिखिलदोषं संश्रितानां सुवेषम् ।
उपनिषदुपघोषं पूरुषं पुण्यकोट्यां
वरदमभिनिषेवे शङ्खचक्रादिभूषम् ॥

कृताञ्जलिपुटोल्लसद्धृदयमङ्घ्रिपद्मं मुनिं
कृतारुणसमुल्लसद्वसनमूर्ध्वपुण्ड्रोज्वलम् ।
कृताननिमतां सदा धुरि शिखोपवीतद्युतं
श्रुतान्तधिषणानिधिं शरणयामि रामानुजम् ॥

कराम्बुजमुल्लसत्समुप · · · · · · कितः
सरोरुहकृतासनस्सरसिजाक्षमालोज्वलः ।
त्रिदण्डपरिमण्डितो दधदुदारपुण्ड्रान्गुरुः
वरो मुनिवरोऽनिशं स्फुरतु मामके मानसे ॥

श्रुतप्रकाशिकाभिधां सुधां · · · · सुसिद्धिदां
सुदर्शनार्यनिर्मितां सुदर्शनां सुधीमताम् ।
सुखेन बोधसिद्धये प्रणम्य तत्पदद्वयं
लिखामि सङ्ग्रहेण तां यतीशभाष्यदीपिकाम् ॥

अस्मद्गुरुं सौम्यवरं मुनीन्द्रं-
व्यासार्यमाख्यातयतीशभाष्यम् ।
प्रणम्य तत्सूक्तिचयेषु भाष्य-
वाक्यप्रकाशावलिमुगृहेऽहम् (?) ॥

श्रीमत्पराङ्कुशयतिर्भाष्यवाक्यार्थदीपिकाम् ।
करोति सुखबोधाय नातिसङ्ग्रहविस्तरम् ॥

भगवान् भाष्यकारः प्रारिप्सितग्रन्थस्य अविघ्नपरिसमाप्तिप्रचयगमनार्थं स्मृत्याचारसिद्धमिष्टदेवतोपासनरूपं मङ्गलं श्रौतमाचरति अखिलेत्यादिना ।

End :

द्वितीयश्लोकमवतारयति यत इति । पारतन्त्र्यप्रतिपत्तिः परमात्मप्रतिपत्तिसापेक्षा, तदभावात्तत्प्रतिपत्त्यभावः इत्यन्यथासिद्धा स्वातन्त्र्यप्रतिपत्तिरित्यर्थः । केवलदेवमनुष्यादिरूपमिति परमात्मशरीरत्वराहितजगद्रूपमात्रमित्यर्थः । अयमर्थः यथा देहात्मभ्रमोऽपरोक्षोऽपि · · · · · ·

R. No. 6503

Palm leaf. 17 and 17⅛ × 1⅜ inches. Foll. 65. Lines, 20 on a page. Grantha. Extent, 2,500 granthas. Slightly injured.

Purchased in 1938-39 from Śri S. Kṛṣṇaswami Ayyangar of Timmavaram, Accharappakkam P.O., Tindivanam.

ब्रह्मसूत्रभाष्यव्याख्या - मितप्रकाशिका ।

BRAHMASŪTRABHĀṢYAVYĀKHYĀ—MITAPRAKĀŚIKĀ.

Breaks off in the course of Mahāsiddhānta which is in Jijñāsādhikaraṇa.

This is a commentary on the Śrībhāṣya of Rāmānujācārya. The author is not known.

Similar to the work described under D. No. 4963.

Beginning :

श्रियः पतिः परमकारुणिको भगवान् सर्वेषां पुरुषाणां उपादित्सित-जिहासितेष्टानिष्टप्राप्तितत्साधनानां त्याज्योपादेयविवेकार्थं वेदाख्यं प्रमाणं प्रदायावतारादिमुखेन तदर्थविषयज्ञानं चोदपादयत् । तच्च ज्ञानं कृतयुगे तेनैवाकारेणावर्तिष्ट । अनन्तरं च तस्मिन्निखिले सति नष्टज्ञानैर्ब्रह्मादिभिरभ्यर्थितो भगवान् व्यासरूपेणावतीर्य, उत्सन्नान् वेदान् उद्धृत्य बहुधा विभज्य तदर्थज्ञानाय सूत्राणि प्रणेष्यन् पूर्वभागवैशद्यार्थं स्वशिष्येण जैमिनिना सूत्राणां प्रणीतत्वात्तदङ्गीकृत्योत्तरभागवैशद्यार्थं ब्रह्मसूत्राणि चकार । तान्येव विवरीतुं प्रारभमाणो भगवान् भाष्यकारः प्रारिप्सित-ग्रन्थस्याविघ्नपरिसमाप्तिप्रचयगमनार्थं स्मृत्याचारसिद्धमिष्टदेवतोपासनरूपमङ्गलं श्रौतमाचरति अखिलेत्यादिना ।

End :

गोत्वतदाश्रयादिष्वेव सहोपलम्भनियमः नान्यत्रेति व्यवस्थासिद्ध्यर्थ-मैक्यं कल्पनीयमिति चेत्तत्राह—इयांस्त्विति । इयानेव नत्वधिकं कल्पनीयमित्यर्थः । यदि सहोपलम्भनियमव्यवस्थासिद्ध्यर्थमैक्यं कल्प्यते तदयुक्तम् । तत्रैवैक्यं नान्या . . . .

(R. Nos. 6504 and 6505 one bundle.)

Palm leaf. 16¾ × 1½ inches. Foll. 27. Lines, 20 on a page. Grantha. Much injured.

Purchased in 1938-39 from Śri S. Kṛṣṇaswāmi Ayyangar of Timmavaram, Accharappakkam P.O., Tindivanam.

R. No. 6504

सुभद्राधनञ्जयम् by गुरुराम ।
SUBHADRĀDHANAÑJAYAM by Gururāma.

Foll. 1*a* to 7*a*. Extent, 225 granthas.

The other work herein is Ratnēsvaraprasādanam. Fol. 7*b*.

Begins abruptly in the middle of the 4th Aṅka and continues up to the end of the work.

Same work as that described under D. No. 12723, but with the addition of one stanza in the end as given below :—

पुण्यश्लोकतमस्य तत्रभवतः पुत्रः स्वयंभूगुरोः
दौहित्रः कवितानिरूढयशसः श्रीराजनाथस्य च ।
रामः कृष्णविलासनाम कृतवान् काव्यं तदर्हन्त्यमी
सन्तश्शोधयितुं समाहितगुणग्राहा दुरूहादते ॥

R. No. 6505

रत्नेश्वरप्रसादनम् by गुरुराम ।
RATNEŚVARAPRASĀDANAM by Gururāma.

Foll. 7*b* to 27*b*. Extent, 700 granthas.

Begins on fol. 7*b* of the MS. described under R. No. 6504.

Complete.

Same work as that described under D. No. 12632, but with the addition of the stanzas in the end as given below :—

प्रतीतिभाग्येऽत्र गुरुः स्वयं भुवि प्रसूतिमासाद्य गुरुः स्वयं-
भुवः ।
गुणाभिरामो गुरुरामनामभाक् प्रसन्नकाव्यप्रणयीदमद्भुतम् ॥
नटनारभटीचटुलस्मरजिन्मकुटीतटिनीसमवाग्विहृतेः ।
गुरुरामकवेः पुरतो विनुतौ गुरुरामगुरुः कविरामकविः ॥

अप्पदीक्षित किमित्यतिस्तुतिं वर्णयामि भवतो वदान्यताम् ।
सोऽपि कल्पतरुरर्थलिप्सया त्वद्गिरामवसरं प्रतीक्षते ॥

धुनाथ भूवलारे नियता वानिना तवैव(व)सुधेयम् ।
or वसुधव तवैव यस्मात् ।
शोणधराधरकाञ्चीचोलनदानि त्वयानुभूयन्ते ॥

इच्छसि यदि सुखमैहिक-
मिच्छसि यदि तच्च मोक्षसाम्राज्यम् ।
तच्चरणं गच्छ मनः
कच्छपलिङ्गं कनद्दयापाङ्गम् ॥

कटाकितचक्षुश्रवसे
कलिता विनतिः करीन्द्रचर्मवसे ।
मस्तकधृतचन्द्रमसे
मायूरक्षेत्रवासिने महसे ॥

करुणापरिपूर्णेभ्यः
कम्पातीरं नमोऽवतीर्णेभ्यः ।
शम्पासमवर्णेभ्यः
शशिखण्डशिखण्डमोहचूर्णेभ्यः ॥

R. No. 6506

Palm leaf. 16¾ and 16⅝ × 1⅜ and 1½ inches. Foll. 21. Lines, 7 and 8 on a page. Grantha. Injured. Extent, 720 granthas.

Purchased in 1938–39 from Śri S. Kṛṣṇaswāmi Ayyangar of Timmavaram, Accharappakkam P.O., Tindivanam.

शिवभक्तानन्दनाटकम् by रक्षानाथः ।
ŚIVABHAKTĀNANDANĀṬAKAM by Rakṣānātha, son of Janārdana of Bhāskaradīkṣita's family.

Complete in five aṅkas.

Same work as that described under R. No. 5092 which is an injured and broken copy.

Beginning :

* * * *

सू—प्रिये किं न जानासि

भार्गवकुलप्रदीपः परमेश्वरभक्तिभावितस्वान्तः ।
भास्करदीक्षितनामा कविगिलश्लाघनीयवाग्गुम्भः ।

नटी—पसिद्धो खुसो !

सू– पौत्रस्तस्य जनार्दनस्य तनयः प्रख्यातनानागुणो
रक्षानाथ इति प्रतीतिमतुलां प्राप्तः कविः श्रूयते ।
यस्यानर्गलसारिइतीपरिमळे श्रीदेवराजो भुवि
ख्यातो हस्तिगिरीश्वरश्च कवितार्धौरेयकौ देशिकौ ॥

End :

। शिवभक्तानन्दनाटकं संपूर्णम् ।

The Scribe adds :—இந்த நாடகம் கிரந்தம். **720.**

R. No. **6507**

Palm leaf 18 and 18½ × 1¼ and 1½ inches. Foll 28. Lines, 6 and 7 on a page. Grantha. Extent, 800 granthas. Much injured and broken.

Purchased in 1938–39 from Śri S. Kṛṣṇaswāmi Ayyangar of Timmavaram, Accharappakkam P.O., Tindivanam.

जातकर्मपद्धतिविवृत्तिः संप्रदायपरिशुद्धिः by **नल्लकोण्डकामाभट्ट** ।

JĀTHAKA KARMAPADDHATIVIVṚTIḤ SAMPRADĀYAPARIŚUDDHIḤ by Nallakoṇḍakāmābhaṭṭa.

Begins in the course of first adyāya and breaks off in the middle of Āyurdāyādhyāya.

This is a commentary on the Jātakakarma paddhati of Śrīpatibhaṭṭa which is described under R. No. 374*a*.

Beginning :

कालेन नतो भवति । नतु मानस्य पूर्वापरस्थितिभेदेन पूर्वापरनतमित्युच्यते । अर्धरात्रे तु स्वाहे रात्रिवृत्तः । परम . . . . . . वा यावान् जन्मकालो भवति तावता कालेन सूर्यपरमोन्नस्थलादुन्नतो भवति । अतः स काल उन्नतसंज्ञक इत्युच्यते ।

Colophon :

। इति नल्लकोण्डकामाभट्टकृतौ संप्रदायपरिशुद्धौ श्रीपतिपद्धतिविवृतौ सम्पूर्णो भावसाधनाध्यायः ।

Colophon :

। इति नल्लकोण्डकामाभट्टकृतौ संप्रदायपरिशुद्धौ श्रीपतिपद्धतिविवृतौ सम्पूर्णो इष्टकालसंज्ञकः ।

अथात आयुर्दायो व्याख्यायते (5th chapter) ।

End :

। अथ सप्तवर्गसकारणान् गुणकानाह ।

ग्रहादिके वर्गगणौ स्वकीये द्विको गुणस्त्र्यंशविवर्जितोनः ।

भधिष्ठनेमित्रग्रहे नवांशा विश्वे धनु . . . . ॥

R. No. 6508

Palm leaf. 15¼ and 15½ × 1¼ and 1⅜ inches. Foll. 105. Lines, 7 to 10 on a page. Telugu. Extent, 4,000 granthas. Injured.

Purchased in 1938–39 from Śri S. Kṛṣṇaswami Ayyangar of Timmavaram, Accharappakkam P.O., Tindivanam.

वेदान्तविजयः by रामानुजदास ।

VEDĀNTAVIJAYAḤ by Rāmānujadāsa.

Contains the first ullāsa complete but the last leaf is broken.

Same work as that described under D. No. 5019.

It is also called "Gurūpasadanavijaya" the first chapter of Vedāntavijaya.

R. No. 6509.

Palm leaf. 14½ × 1⅞ inches. Foll. 68. Lines 11 to 16 on a page. Grantha. Extent, 4,500 granthas. Slightly injured.

Purchased in 1938–39 from Śrī S. Kṛṣṇaswāmi Ayyangār of Timmavaram, Accarappakkam P.O., Tindivanam.

तर्कसङ्ग्रहदीपिकाटिप्पणी तत्वार्थदीपिका by वेङ्कटाचार्यः ।

TARKSAṄGRAHADĪPIKĀṬIPPAṆĪ TATTVĀRTHADĪPIKĀ by Veṅkaṭācārya, son of Śrīśailadeśika.

Same work as that described under R. No. 1667 wherein see for beginning.

The first page consists of a fragment of Tarkasaṅgrahadīpikā.

Complete.

End :

उक्तमर्थमुपसंहरति तस्मादिति ।
अस्त्वत्र बहु वक्तव्यमधिकोक्तिश्च वर्तताम् ।
अथाप्यस्ति विशेषोऽपीत्यनुगृह्णन्त्वमत्सराः ॥
व्युत्पित्सूनां हितायेयं वेङ्कटार्येण निर्मिता ।
तनोतु सुधियां प्रीतिं तर्कसङ्ग्रहटिप्पणी ॥

Colophon :

इति श्रीवाधूलकुलतिलकश्रीशैलदेशिकतनयस्य श्रीवेङ्कटगुरोः कृतिषु तत्वार्थदीपिका नाम तर्कसङ्ग्रहटिप्पणी समाप्ता ।

R. No. 6510.

Palmleaf. 15¼ and 16½ × ⅞ and 1 inches, Foll. 136. Lines. 3 to 5 on a page. Telugu. Extent. 2,500 granthas. Much injured.

Purchased in 1938–39 from Sri S. Kṛṣṇaswāmi Ayyangar of Timmavaram, Accharappakkam P.O., Tindivanam.

विरूपाक्षचम्पूः ।

VIRŪPĀKṢA CAMPŪḤ.

Begins abruptly in the middle of 3rd kāṇḍa and continues up to the end of 4th kāṇḍa.

A treatise in verse and prose style. This work deals with the greatness and holiness of Vidyānagar or Vijayanagar, which is not only famous for its historical importances but for the sanctity of that shrine and Lord Virūpakṣa, situated therein. One Vidyāranya, after whose name, as it is known traditionally, the Vizayanagaram is called Vidyanagara, Pampa river, Kiskindha hills and Raṅganātha, situated therein and some kings are all mentioned here. It mainly describes the car festival of Virūpākṣa or Pampāpati.

It appears from the colophon herein that one Virūpākṣa may be the author of this work. It is not known whether he is identical with the Colacampū and Sivavilāsa campū *vide* Tanj. Cat., Vol. VII No. 3231 or the author of Nārāyaṇīvilāsanāṭaka, Amṛtasidhiyōga and Cāturmāsya Kalpavallī, *vide* pages 6 and 90 of the first part of Seshagiri Sastri's report.

Beginning :

. . . . . रमणीयोद्यानमास्थितेषु केषुचिदस्मिन्नेव दिने समाराधितैः द्वित्रैर्वा ब्राह्मणैः सहस्राराधनफलं . . . . यैव तपनात-पतप्तान्यपि सरिद्गतायतशिलातलान्यास्थितेषु . . . . केचन तीर्थद्विजालाभेऽपि पंपापतिप्रीणनाय स्वावास एव . . . . ।

* * * *

Colophon :

विरूपाक्षदेवस्य चम्पूप्रबन्धे
वसन्तोत्सवाख्यानसर्वातिहृद्ये ।
सदा शृण्वतां पुण्यसम्पत्पदेऽस्मिन्
रथोत्साहकाण्डस्तृतीयश्च पूर्णः ॥

* * * *

श्रीपम्पेशरथोत्सवाश्रितकथामेतां सपूर्वेक्षणं
श्रुत्वा पामुडिपट्टणाधिपमहाभोगेश्वरस्सादरम् ।
सुप्रीतः पुनरादिदेश तमिमं विप्रं ततः किं परं
ब्रूहीति स्वयमेवमुत्तरमयं प्राह द्विजोऽहोबलः ॥

Colophon :

विरूपाक्षदेवस्य चम्पूप्रबन्धे सपूर्वेक्षणं
वसन्तोत्सवाख्यान सर्वातिहृद्ये ।
सदा शृण्वतां पुण्यसम्पत्पदेऽस्मिन्
न्नसावुत्तरस्तुर्यकाण्डस्तु पूर्णः ॥

R. No. **6511**

Palm leaf. 19¾ × 1½ inches. Foll. 73. Lines, 8 to 10 on a page. Grantha. Extent, 2,500. Slightly injured.

Purchased in 1938-39 from Śri S. Kṛṣṇaswami Ayyangar of Timmavaram, Accharappakkam P.O., Tindivanam.

शतदूषणीव्याख्या—सहस्रकिरणी by श्रीनिवासाचार्य ।

ŚATADŪṢAṆĪVYĀKHYĀ—SAHASRAKIRAṆĪ by Śrīnivāsācārya.

Begins in the middle of the first ullāsa and breaks off in the course of the same ullāsa.

Same work as that described under R. No. 1273.

Beginning :

तत्र सद्रूपतासन्देहो भवति । सद्रूपत्वञ्च यथा प्रत्यक्षयोग्यं तथोत्तरत्र निरूपयिष्यते । किञ्च गौरवभिया प्रप . . . सद्रूपत्वं यदि ना . . . .

. . . . तर्हि ब्रह्मणोऽपि तन्न स्यात् । ब्रह्मरूपस्य परमार्थसतोऽपि अनभ्युपगमे ततोऽपि लाघवात् प्रमाणविरुद्धलाघवानादरस्य प्रपञ्चांशे . . . . . .

* *

इत्थं निर्मूलितं सिद्धिचन्द्रिकादिपरिष्कृतम् ।
तद् . . . . . द्यमिथ्यात्वं प्रीयतां श्रीहयाननः ॥

End :

सदधिष्ठानकेति । अबाध्यत्वोपाहितविशेष्यकेत्यर्थः । आवश्यकेनार्थक्रियाकारित्वेनालीकयावृत्तेन सन् घट इत्यादिप्रत्ययोपपत्तेरुक्ताबाध्यत्वं माध्यमिकेन न स्वीक्रियते । न चैवं तन्मते शून्यभावना व्यर्थेति वाच्यम् । तस्याः परमकाष्ठापन्नवैराग्यहेतुत्वेन प्रपञ्चस्वरूपबा . . . . त्वेन . . . . .

R. No. 6512

Palm leaf. 15¾ and 16 × 1⅝ inches. Foll. 191. Lines, 11 and 12 on a page. Grantha. Slightly injured. Extent, 7,000 granthas.

Purchased in 1938–39 from Śrī S. Kṛṣṇaswami Ayyangar of Timmavaram, Accharappakkam P.O., Tindivanam.

शाब्दिकचिन्तामणिः by गोपालकृष्णशास्त्रिन् ।

ŚĀBDIKACINTĀMAṆIḤ by Gōpālakṛṣṇa Śāstrin.

It is known from below-mentioned stanzas that the portion of the work beginning from the first Āhnika of the third pāda, of the first Adhyāya, up to the end of fourth Āhnika of the fourth Pāda of the first Adhyāya is said to have been completed by Anantanārāyaṇa Śāstri, elder brother of Anantavenkaṭeśvara and disciple and son of Gōpālakṛṣṇa Śāstri.

Same work as that described under R. Nos. 1355 and 143.

Contains the following portions :—

I Āhnikam of the first pāda of the first Adhyāya. II and III Āhnikams of the second pāda of the first Adhyāya first Āhnikam of third pāda of the same Adhyāya. Breaks off in the end of second Āhnika of the third pāda of the first Adhyāya.

श्रीमद्गोपालकृष्णाख्यमहागुरुपदाम्बुजम् ।
नामं नामं पुत्रताप्त्यै कुर्वे तत्क्रान्तिपूरणम् ॥
पित्रारब्धस्य पूर्त्या तत्त्राणात्पुत्रो निरुच्यते ।
त्राणं च पुण्यलोकाप्तप्रतिबन्धकपातकात् ॥
आरब्धस्यान्तगमनाभावमूलात् प्रचक्षते ।
बृहदारण्यकेऽध्याये तृतीयेऽन्ते समीरितम् ॥
स यद्यनेनेतिवाक्यमत्र मानं विमृश्यताम् ।

* * * *

श्रीमद्गोपालकृष्णार्यचिन्तामणि . . . नराः ।
सर्वोत्तमाः प्रकाशन्ते कौस्तुभाद्यनपेक्षिणः ॥
समर्थसूत्रपर्यन्तो ग्रन्थोऽयं तैः प्रतिश्रुतः ।
तत्परिश्रवणं मां हि प्रवर्तयति कान्तवत् ॥
श्रीमद्गोपालकृष्णार्यस्मृतयः कामधेनवः ।
या वत्सकुलजीवातुभूता अमृतदा अपि ॥

(R. Nos. **6513 to 6517** one bundle.)

R. No. **6513**

Palm leaf. 15 × 1⅝ inches. Foll. 18. Lines, 7 and 8 on page. Grantha. Injured.

Purchased in 1938–39 from Śrī S. Kṛṣṇaswami Ayyangar of Timmavaram, Aocharappakkam P.O., Tindivanam.

सामुद्रिकलक्षणम् by वररुचिः ।

SĀMUDRIKALAKṢAṆAM by Vararuci.

Foll. 1*a* to 4*a*. Extent, 85 granthas.

The other works herein are :—Āsanamantra. fol. 4 *b*, Prāṇapratiṣṭhāmantra, fol. 5*b*, Sudarśanamantra, fol. 7*a*, Śilpaśāstram (with Tamil meaning) fol. 9*a*.

Wants beginning and consists of two prayogas called puruṣalakṣaṇam and Strīlakṣaṇam.

Similar to the work described under R. No. 1248 *a*.

Beginning :

दीर्घमायुः परीक्षेत पश्चाल्लक्षणमादिशेत् ।
आयुर्हीननराणां तु लक्षणैः किं प्रयोजनम् ॥

साक्षात्त्रैलोक्यस . . . . . . ज्ञा केवलभाषितम्
त्रिकालविजयं प्रोक्तं तस्मै सर्वविदे नमः ॥
बाहुनत्रान्तरैश्चैव हनुनासा तथैव च ।
. . . . . रंचैव पञ्चदीर्घः प्रशस्यते ॥
ग्रीवा प्रजननं पृष्ठं ह्रस्वजङ्घा च पूज्यते ।

Colophon :

इति वररुचिना कृते सामुद्रिकलक्षणे पुरुषलक्षणं नाम प्रयोग स्सम्पूर्णः ।

* * * * * *

कीदृशीं वरयेत्कन्यां कीदृशीं वा परित्यजेत् ।
कीदृशी कुलनारी स्यात् तादृशीं वक्तुमर्हति ॥

End :

वर्जनीया च सा नारी यत्नतोऽरिविनाशिनी ।
केशे सदा पुष्पधरा माल्यगन्धविभूषणा ॥
यां श्रियं चापि सततं सुखजीवा . . . . . ।
स्त्रीणां च पुरुषाणां च स्निग्धा चैव प्रशस्यते ।
मृगपाक्षिसनामा च नारी नक्षत्रनामिका ।
कपिनामा च या कन्या तां कन्यां परिवर्जयेत् ॥
. . . . . प्यसिता च नारी तीक्ष्णस्वरा रोमाचितोत्तरोष्ठी ।
एकापि तद्रूपुरुषत्वमेति हत्वा पतिं गच्छति सर्ववर्णा ॥

Colophon :

इति वररुचिना कृते सामुद्रिकलक्षणे स्त्रीलक्षणं नाम उत्तरप्रयोगः सम्पूर्णः ।

R. No. 6514

आसनमन्त्रः ।

ĀSANAMANTRAḤ.

Foll. 4*b* to 5*b*. Extent, 25 granthas.

Begins on fol. 4*b* of the MS. described under R. No. 6513.

Complete.

Similar to the work described under D. No. 5993.

Beginning :

आब्रह्मलोकादाशेषादालोकालोकपर्वतात्।
ये वसन्ति द्विजा देवाः तेभ्यो नित्यं नमाम्यहम् ॥

आसनमन्त्रस्य । पृथिव्या मेरुपृष्ठऋषिः । सुतलञ्छन्दः । कूर्मो नरायणो देवता । श्रीं बीजम् । स्वाहा शक्तिः । मेरुपर्वताग्रे आसने विनियोगः ।

End :

इति प्राचीनयोग्योपास्व । आपादाज्जानुपर्यन्तममज . . . . . . चिरं तिष्ठन्तु जान्वादिनाभिपर्यन्तं मम । नाभ्यादिहृदयपर्यन्तं मम । हृदादिभ्रूमध्यपर्यन्तं मम । भ्रुवादिब्र . . . . णपर्यन्तं मम जीवे सुखं चि(रं)तिष्ठतु ।

R. No. **6515**

प्राणप्रतिष्ठामन्त्रः ।

PRĀṆAPRATIṢṬHĀMANTRAḤ.

Foll. *5b* to *6b*. Extent, 15 granthas.

Begins on fol. *5b* of the MS. described under R. No. 6513.

Same work as that described under D. No. 6677, wherein see for the beginning and 6679 wherein see for the end.

Complete.

R. No. **6516**

सुदर्शनमन्त्रः ।

SUDRAŚANAMANTRAḤ.

Foll. *7a* to *8a*. Extent, 25 granthas.

Begins on fol. *7a* of the MS. described under D. No. 7527.

Beginning :

अस्य श्रीसुदर्शनमन्त्रस्य । अहिर्बुध्न्य ऋषिः । विराट् छन्दः । श्रीसुदर्शनो देवता । हुं बीजम् । फट् शक्तिः । इष्टार्थसिद्ध्यर्थे विनियोगः । अ[ग्नये] स्वाहा हृदयाय नमः । त्रिचक्राय स्वाहा । शिरसे स्वाहा । सुचक्राय स्वाहा शिखयै वौषट् ।

End :

हिरण्यकशिपुहिरण्याक्षराक्षसोन्मत्ताङ्गहरितविदारणाय एहि एहि । गरुडध्वजाय सर्पानहं चक्रेण च्छिन्दि च्छिन्दि । मुद्गरशङ्खचक्रगदोद्गदेन

भूतदानवडाकिनीनां भयभेदेन चूर्णय चूर्णय; त्रासय त्रासय, मारय मारय, क्षोभय क्षोभय, दूरय दूरय, आक्रामयाक्रामय । ओं ह्रां ह्रीं विष्णव स्वाहा ।

Fol. 8*b* is left blank.

R. No. **6517**

शिल्पशास्त्रम् द्राविडटीकासहितम् ।

ŚILPAŚĀSTRAM with Tamil meaning.

Foll. 9*a* to 18*a*. Extent, 200 granthas.

Begins on fol. 9*a* of the MS. described under R. No. 6513.

Incomplete.

Same work as that described under D. No. 13050. Contains the chapters Āyādilakṣaṇa and Hanumatsthāpana only. Some Astrological matters also have been included in the middle.

Fol. 18*b* is left blank.

End :

विष्णोः पूर्वं प्रतिष्ठा चेत् स्वतन्त्रमभिधीयते ।
आश्रयग्रामदेशे तु अस्वतन्त्रं प्रकीर्तितम् ॥
स्वतन्त्रोत्सवदेशे तु अस्वतन्त्रोत्सवं चरेत् ।
तद्ग्रामयजमानश्च राजा राष्ट्रं विनश्यति ॥

R. No. **6518**

Palm leaf 17½ and 17⅝ × 1½ inches. Foll. 68. Lines, 7 and 8 on a page. Grantha. Extent, 1,800 granthas. Slightly injured.

Purchased in 1938–39 from Śrī S. Kṛṣṇaswāmi Ayyangar of Timmavaram, Accharappakkam P.O., Tindivanam.

मीमांसाधिकरणन्यायविचारः ।

MĪMĀMSĀDHIKARAṆA NYĀYAVICĀRAḤ.

Incomplete.

Same work as that described under D. No. 4456. The name of this work has been mentioned as मीमांसाधिकरणविचार on the left edge o the first folio.

R. No. 6519

Palm leaf. 14¼, 15½ and 15½ × 1¼ and 1⅜ inches. Foll. 80. Lines, 7 to 9 on a page. Grantha. Extent, 3,000 granthas. Injured.

Purchased in 1938-39 from Śrī S. Kṛṣṇaswāmi Ayyangar of Timmavaram, Accharappakkam P.O., Tindivanam.

शारीरकन्यायमाला by रङ्गनाथः ।

ŚĀRĪRAKANYĀYAMĀLĀ by Raṅganātha.

Complete.

An independent commentary on the Brahmasūtrās in accordance with the views of Rāmānuja by Raṅganātha.

Beginning :

गुरून्प्रणम्य सततं तद्गुरूंश्च दयानिधीन् ।
तदाज्ञां शिरसा धृत्वा तदुक्तं लिख्यतेऽधुना ।
शारीरकन्यायमाला नस्तोकं नातिविस्तरम् ।
क्रियते सुमनःप्रीत्यै रङ्गनाथविपश्चिता ॥

व्याख्येयश्रुतेरैक्यात् पौर्वापर्या(च्च)शास्त्रैक्यपौर्वापर्ये सिध्येते । तच्च शास्त्रकाण्डं देवकाण्डं ब्रह्मकाण्डमिति त्रिधा ।

अल्पास्थिरफलत्वेन कर्मज्ञानात् ब्रह्मज्ञाने प्रवृत्तिः । ब्रह्म चा . . . . न्तफलमिति ज्ञानाच्च पूर्वकाण्डन्यायाभ्युपगमेन व्यासेन चतुरध्यायसंमितं ब्रह्मकाण्डमारभ्यते । प्रथमे लक्षणे ब्रह्मणः कारणत्वं, द्वितीये परपक्षप्र(ति)क्षेपः, आहत्याद्यद्विके ब्रह्मस्वरूपं प्रतिपाद्यते । उत्तरद्विके तत्प्राप्त्युपायफले प्रतिपाद्येते ।

* * * *

तत्र पूर्वपक्षसिद्धान्तावेव वदामः । अन्यत् ज्ञातुं शक्यम् ॥ प्रथमाध्यायप्रथमपादप्रथमाधिकरणमारंभयति ; अथातो ब्रह्मजिज्ञासा ।

Colophon :

इति प्रथमाध्यायस्य चतुर्थः पादः । समाप्तश्चाध्यायः ।

End :

सूत्राभ्यासः शास्त्रसमाप्तिं द्योतयति । इति सर्वं समञ्जसम् ।

Colophon :

इति चतुर्थाध्यायस्य चतुर्थः पादः । समाप्तश्चाध्यायः । शास्त्रं समाप्तम् ।

प्रथमाध्यायस्य प्रथमपादे अधिकरणानि ...	११
,, द्वितीयपादे ,, ...	६
,, तृतीयपादे ,, ...	१०
,, तुरीयपादे ,, ...	८
	३५
एवं च प्रथमाध्याये अधिकरणानि ३५	
द्वितीयस्याध्यायस्य प्रथमपादे अधिकरणानि ..	१०
,, द्वितीयपादे ,, ...	७
,, तृतीयपादे ,, ...	८
,, तुरीयपादे ,, .	९
एवं च द्वितीयेऽध्याये अधिकरणानि	३४
तृतीयाध्यायस्य प्रथमे पादे अधिकरणानि ..	६
,, द्वितीये पादे ,, ...	८
,, तृतीये पादे ,, ...	२६
,, तुरीये पादे ,, ...	१५
एवं च तृतीयाध्यायस्याधिकरणानि	५५
चतुर्थस्याध्यायस्य प्रथमे पादे	११
,, द्वितीये पादे	११
,, तृतीये पादे	५
,, तुरीये पादे	६
एवं च चतुर्थाध्याये अधिकरणानि	३३
अस्य शास्त्रस्याधिकरणानि ...	(156) [१५७]

Herein the number 157 has been corrected as 156 but according to the figures noted against the adhyāyas this must be 157.

सूत्राणि (५१९)

R. No. 6520

Palm leaf. 18 × 1½ inches. Foll. 37. Lines, 7 on a page. Grantha. Extent, 1,000 granthas. Injured.

Purchased in 1938–39 from Śrī S. Kṛṣṇaswami Ayyangar of Timmavaram, Accharappakkam P.O., Tindivanam.

पाद्मतन्त्रम् ।

PĀDMATANTRAM.

Contains addhyāyas 2 to 11 complete, 1 and 12 incomplete.

Same work as that described under D. No. 5290.

Beginning :

. . . . मेदतः ।
मूले मूर्ध्नि शैलानां नद्यास्तीरे च सङ्गमे ।
समुद्रतीरे पुलिने ह्रदे तीर्थे च कानने ।
एतेषु निर्मितं स्थानं सिद्धाख्यं . . . ।
. . . . मं तत्र स्थापितश्चेद्यथाविधि ॥
मनुष्यैर्निर्मितं ग्रामनगरादौ गृहं मम ।
असिद्धायतनं विद्धि ग्रामादिस्थितिहेतुकम् ॥

End :

लब्धांशमङ्गुलीकृत्य तदङ्गुलमथाष्टभिः ।
वर्द्धयेद्धासयेच्चैव(पुन)द्वादशसङ्ख्यया ॥
आद्यं शिष्टाङ्गुलं ज्ञेयं व्यये नवभिरेधयेत् ।
दशभिः क्षपयेच्छिष्टमङ्गुलं . . . . . ॥

R. No. 6521

Palm leaf. 12¾ × 1¼ inches. Foll. 23. Lines, 7 on a page. Grantha. Extent, 500 granthas. Injured.

Purchased in 1938–39 from Śrī S. Kṛṣṇaswami Ayyangar of Timmavaram, Accharappakkam P.O., Tindivanam.

परमाद्वैतसिद्धान्तपरिभाषा by उपनिषद्ब्रह्मयोगी ।

PARAMĀDVAITASIDDHĀNTA PARIBHĀṢĀ by Upaniṣadbrahmayogin.

Complete.

An epitome of various views regarding Paramādvaita doctrine by Upaniṣadbrahmayogi, a disciple of Sri Vāsudeva. This work explains various technical terms used in Paramādvaitasiddhānta.

This work is said to have been begun on the 8th day of the month of Śrāvaṇa in the year Virodhi and completed on Thursday, the 3rd of the newmoon of the month of Simha in the year Virodhi.

Beginning :

"परमाद्वैतभाषा" ।

स्वाविद्यापदतत्कार्यमस्तिनास्तीति विभ्रमः ।
यत्रापह्नवतां याति त्रैपदं तद्विशिष्यते ॥
नत्वा श्रीदेशिकपदं कैवल्यानन्दमिच्छताम् ।
तदाप्तये पराद्वैतपरिभाषा वितन्यते ॥

इह खलु भगवतो लीलाविभूतिः स्वांशजप्राणिपटलस्वपदाप्त्युपायतया . . . . . . पीशाद्यष्टोत्तरशतोपनिषत्सारसङ्ग्रहभूतपरमाद्वैतदर्शनत्रिपात्स्वाविवेकसत्तासामान्यविवेकब्रह्मप्रणवदीपिकादौ ।

* * *

"त्रैपदब्रह्मचैतन्यं पराद्वैतं विशिष्यते" इति श्रुतेः परमाद्वैतमेव त्रैपदमिति सिद्धम् । द्वितीयं त्रैपदप्रकरणम् । त्रैपदस्य परमाद्वैतत्वेऽपि सत्तासामान्यं त्रैपदभिन्नमित्यत्र

End :

मात्रा पञ्चदशग्रासं . . . . स्वरूपकम् ।
कैवल्यनाडिकान्तस्थचिदाकाशतया स्थितम् ॥
परमाद्वैतमेवेह त्रैपदं स्या . . . . ।
. . . . . ग्यं तुर्यतुर्यं कैवल्यमेव शिष्यते ॥ इति
श्रुतेः स्मृतेश्च ।

Colophon :

। ओं तुरियतुर्यप्रकरणम् ।

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
परमाद्वैतसिद्धान्तपरिभाषा कृता लघुः ॥
. . . . . विंशाधिकशतत्रयम् ।

The scribe adds :

विरोधिसंवत्सरसिंह्मशुक्लतृतीयगुरुवासरहस्तनक्षत्रसहितशुभदिने परमाद्वैतपरिभाषा . . . . . समाप्तिमगमत ; तुम्बवनं कश्चिशास्त्रिस्वहस्तलिखितम् ।

R. No. 6522

Palm leaf. 18⅞ × 1½ inches. Foll. 18. Lines, 7 and 8 on a page. Telugu. Extent, 600 granthas. Injured.

Purchased in 1938-39 from Śrī S. Kṛṣṇaswami Ayyangar of Timmavaram, Accharappakkam P.O., Tindivanam.

ब्रह्मसूत्रभाष्यव्याख्यानम् (पञ्चपादिकाविवरणम्)
BRAHMASŪTRA BHĀṢYAVYĀKHYĀNAM (PAÑCAPĀDIKĀVIVARAṆAM.

Incomplete.

Same work as that described under D. No. 4667.

Beginning :

विषयप्रयोजनसिद्धिहेतोरध्यायस्य उपस्थापकत्वादिति ब्रूमः । हेतुवचन . . . . . मे साधयति । तथाहि एतच्छास्त्रमारंभणीयं, संभावितविषयप्रयोजनत्वात् , कृष्यारंभवत् शास्त्रं च संभावितविषयप्रयोजनं, अविद्यात्मकबन्धप्रत्यनीकत्वात् जाग्रद्बोधवदिति, तदेवं शास्त्रारंभनिमित्तविषयप्रयोजनप्रत्यनीकबन्धस्य, अविद्यात्मकत्वं निर्दिशद्भाष्यद्वयं विषयप्रयोजने प्रतिपादयतीति ।

End :

तदेवं पारिशेष्यादिति आ(अ)ख्यातिदूषणमप्युक्तमनुस्मारयति । ननु स्मृतेरिति । ननु न स्मृतिर्नापि ग्रहणं चेदलौकिकं इदं ज्ञानं कथमिति चोदयति—का तर्हि गतिरिति । किं सामग्र्यं पृच्छसि किं वा ज्ञानं, अथ विषयमिति । यदि सामग्र्यं तत्राह नेन्द्रियजज्ञानादित्यादिना । नन्विन्द्रियसंस्कारौ चेत सामग्री, सम्यग्ज्ञानमेवेदं स्यात् । स्मृतिग्रहण . . . . तद्राति । ननु दोषः प्राप्तकार्यप्रतिबन्धकानाधिक्ये हेतुरित्यत आह—

R. No. 6523

Palm leaf. 15½ × 1⅛ inches. Foll. 38. Lines, 6 to 8 on a page. Grantha. Extent 750 granthas. Slightly injured.

Purchased in 1938–39 from Śrī S. Kṛṣṇaswami Ayyangar of Timmavaram, Accharappakkam P.O., Tindivanam.

शैवदीक्षाविधिव्याख्या ।

ŚAIVADĪKṢĀVĪDHIVYĀKHYĀ.

Incomplete.

A commentary on Śaivadīkṣāvidhiḥ, a work connected with the ceremony intended for the initiation and other religious functions of Vīraśaivas.

Beginning :

"स्थितौ या नानुगृह्णाति गुरुमास्थाय विन्दत" इति मृगेन्द्रश्रुतेः स्थितिकाले सकलानां गुरुमधिष्ठाय सन्निष्ठन् भगवाननुगृह्णातीति हृदि निधायाह गुर्वधिकरणारूढ इति । आदिष्टाः आज्ञापिताः । किमत इत्याह इमे इति ।

End :

उल्मुकशब्देन अलातमुच्यते । 'अङ्गारालातमुल्मुक' मित्यमरः ।

R. No. 6524

Palm leaf. 15½ × 1½ inches. Foll. 27. Lines, 7 to 10 on a page. Telugu. Extent, 1,000 granthas. Good. Printed.

Purchased in 1938–39 from Uppili Iyengar, of Kumbakonam.

सिद्धान्तचिन्तामणिः by श्रीनिवासाचार्यः ।

SIDDHĀNTACINTĀMAṆIḤ by Śrīnivāsācārya, son of Lakṣmāmbā and Śrīśaila Śrīnivāsatātācārya.

Incomplete.

Though it is mentioned in the MS. as a complete copy it breaks off in the middle.

Same work as that described under R. No. 2120 which is a complete copy.

End :

एकविज्ञानेन सर्वविज्ञानमपि न युक्तम् । तथा सति ब्रह्मविदां मेरुगुहान्तर्वर्तिपदार्थसन्देहाभावप्रसङ्गात् । अश्रुतत्वश्रुतत्वयोर्विरोधेन एकस्मिन्नसंभवाच्च । अथ कालभेदेन तत्सम्भव इत्युच्यते चेत्तथापि कारणकार्ययोर्भेदे अन्यज्ञानेनान्यज्ञानासम्भव इति सर्वं समञ्जसम् ।

Colophon :

इति सिद्धान्तचिन्तामणिः समाप्तः ।

R. No. 6525.

Palm leaf. 15⅞ to 16½ × 1¼ inches. Foll. 53. Lines, 7 in a page. Telugu. Extent, 1,500 granthas. Good.

Purchased in 1938–39 from Cakravarti Jagannāthācarya of Kumbakonam.

परिभाषेन्दुशेखरव्याख्या—गदा by वैद्यनाथ (पायगुण्ड) ।

PARIBHĀṢĒNDUŚĒKHARAVYĀKHYĀ—GADĀ by Vaidyanātha (Pāyaguṇḍa).

Breaks off in the course of Antaraṅgaparibhāṣā, the 51st.

Same work as that described under R. No. 588.

Beginning :

ब्रह्मादयो यस्य न पारमाप्नुवन्
गङ्गाद्भुतं मस्तकदेशवासिनी ।
वामार्धदेहापि न चण्डिका वयं
ध्यायामि देवं सनकादिवन्दितम् ॥
वैद्यनाथः पायगुण्डो नत्वा नागेश्वरं गुरुम् ।
विवृतिं परिभाषेन्दुशेखरे तनुते गदाम् ॥

(R. No. **6526** to **6532** one bundle.)

Palm leaf. 17¼ × 1½ inches. Foll. 130. Lines, 6 to 11 on a page. Grantha. Slightly injured.

Purchased in 1938–39 from Cakravarti Jagannāthacārya of Kumbakonam.

R. No. **6526**

तत्वचिन्तामणिदीधितिप्रकाशिका by गदाधरभट्टाचार्यः ।

TATTVACINTĀMAṆIDĪDHITIPRAKĀŚIKĀ by Gadādharabhaṭṭācārya.

Foll. 1*a* to 69*b* lines, 7 and 8 on a page. Extent, 2,500 granthas. Printed.

The other works herein are :—Parāmarśavāda fol. 70*a*, Vyāptivāda, fol. 93*a*, Sādhāraṇakrōḍapatram, fol. 105*a*, Hētvābhāsakrōḍapatram, fol. 113*a*, Siddhāntalakṣaṇa ṭippaṇī, fol. 118*a*, Siddhāntalakṣaṇavicāra, fol. 126*a*.

Same work as that described under D. No. 4047.

Contains Parāmarśavāda only complete. This MS. consists of a fragment of Parāmarśacintamaṇi and a portion of Dīdhiti. According to the printed edition published in chowkhamba series the parāmarśaprakaraṇa of Gadādhari also is not complete.

R. No. 6527

परामर्शवादः ।

PARĀMARŚAVĀDAḤ.

Fol. 70*a* to 92*b*. Lines 8, and 9 on a page. Extent, 800 granthas.

Begins on fol. 70*a* of the MS. described under R. No. 6526.

Complete.

Same work as that described under D. No. 4044.

R. No. 6528

व्याप्तिवादः ।

VYĀPTIVĀDAḤ.

Foll. 93*a* to 104*a*. 104*b* is left blank. Extent 250 granthas.

Begins on fol. 93*a* of the MS. described under R. No. 6526.

Similar to the work described under D. No. 4289.

Complete.

Beginning :

मूले प्रतियोग्यवृत्तिश्च धर्मो न प्रतियोगितावच्छेदकः इति व्यधिकरणधर्मावच्छिन्नाभावनिराकर्तुर्वादिनः प्रतिज्ञावाक्यम् । तत्र धर्मत्वमनुपादेयवृत्तेरपि प्रतियोगितावच्छेदकतायाः निराकर्तव्यत्वात् । तत्वे साधकाभावात् इति हेतुरूह्य ·

End :

गीर्वाणगुरूणामपि न श⋯च्यमित्यनेन तादृशप्रतीतिकारणत्वेन तादृशाभावनिराकरणप्रवृत्ता निर्भरवन्तो मिश्रादय आक्षिप्ताः । यदि तदेत्यनेन तादृशप्रतीतिरानुभाविकत्वे विवादं प्रदर्श्य तादृशाभावस्यापारमार्थिकत्वं सूचितम् ।

R. No. 6529

साधारणक्रोडपत्रम् ।

SĀDHĀRAṆAKROḌAPATRAM.

Foll. 105*a* to 112*b*. Lines, 8 and 9 on a page. Extent, 300 granthas.

Begins on fol. 105*a* of the MS. described under R. No. 6526.

Similar to the work described under No. 4319.

Complete.

Beginning :

विपक्षवृत्तित्वं साधारण्यमिति मूलस्य विपक्षपदस्य साध्याभाववदर्थकत्वमिति शिरोमणिमतम्। साध्याभावनिश्चयविषयार्थकत्वमिति मिश्रमतम्।

तत्र मिश्रमतानुसारिणां मिश्रमतासिद्धलक्ष्यभावस्य धूमाभावनिश्चयविषयायोगोलकवृत्तित्वादेः हेत्वाभाससामान्ये लक्षणयोगित्वनिर्वाहप्रकारो गदाधरभट्टाचार्यैरित्थमुपन्यस्तः ।

End :

भवतु ज्ञानद्वयप्रतिबन्धकतायां युक्त्यभावः, तथापि प्राचीनमतानुसारेण मणिकृदङ्गीकृतज्ञानद्वयप्रतिबन्धकतामादाय मणिग्रन्थं व्याचक्षाणानां मिश्राणां कोऽयं दोष इत्यलं पल्लवितेन ॥

R. No. 6530.

हेत्वाभासक्रोडपत्रम् ।

HĒTVĀBHĀSAKROḌAPATRAM.

Foll. 113*a* to 116*a*. Lines, 9 to 11 on a page. Extent, 150 granthas.

Begins on fol. 113*a* of the MS. described under R. No. 6526.

Incomplete.

Similar to the work described under D. No. 4237.

Beginning :

अथ समानविशेष्यतावच्छेदकत्वप्रत्यासत्त्या प्रतिबध्यप्रतिबन्धकभावो न संभवति। विशिष्य धर्मितावच्छेदकधर्मानिवेशे निश्चयत्वस्य दुर्वचत्वात् ।

* * * *

अत्र केचित्—संशये तादृशविशेष्यता कल्पयितुमशक्यैव । ह्रदो वह्न्यभाववान्, नीलह्रदो वह्न्यभाववान् वेति संशयस्य तथात्वायोगात् ।

* * * *

End :

न चैवं ह्रदत्वसामानाधिकरण्येन वह्नित्वाद्यभावोभयावगाहिज्ञानसंग्रह इति वाच्यम् । स्वव्यापकत्वावच्छिन्नसंसर्गतानिरूपितत्वसहितस्वावच्छेदकावच्छिन्नविशेष्यतानिरूपितान्यतरत्वकाग्यस्यैव भेदप्रतियोगितावच्छेदकता घटकसंबन्धत्वोपगमात् ।

Foll. 116*b* to 117 contains a commentary on Tarkasaṅgraha.

R. No. **6531**

सिद्धान्तलक्षणटिप्पणी ।

SIDDHĀNTALAKṢAṆAṬIPPAṆĪ.

Foll. 118*a* to 125*b*. Lines, 7 to 11 on a page. Extent, 250 granthas.

Begins on fol. 118*a* of the MS. described under R. No. 6526.

Complete.

A short critical pamphlet on siddhāntalakṣaṇam portion of Gadādhari.

Similar to the work described under D. No. 6526.

Beginning :

प्रत्येकं घटादौ घटपटोभयत्वावच्छिन्नस्य भेदवत् शुद्धवह्नित्वादौ महानसीयत्वाद्यनन्तर्भावेन पर्याप्तविशिष्टवह्नित्वाद्यभावीयप्रतियोगितावच्छेदकतावच्छिन्नभेदस्य सुघटत्वात् । अवच्छेदकत्वस्य वह्नित्वमहानसीयत्वादिनिष्ठस्य सम्बन्धादिभेदेऽपि तत्तत्प्रतियोगितावच्छेदकत्वाद्यनुगतरूपेण व्यासज्यवृत्तितायाः चक्रवर्तिलक्षणे वह्नित्वादेरवच्छेदकत्वपर्याप्त्यनधिकरणत्वमुपपादितवतो दीधितिकारस्यानुमतत्वादिति भट्टाचार्याः ।

अथ साध्यतावच्छेदके हेतुसमानाधिकरणतदभावप्रतियोगितावच्छेदकतात्वविशिष्टावच्छिन्नभेदकूटस्य हेतुसमानाधिकरणाभावा ये तत्तत्प्रतियोगितावच्छेदकतात्वाविशिष्टावच्छिन्नभेदकूटस्य वा निवेशे असवज्ञस्य दुर्ज्ञेयत्वापात्तः ।

End :

आस्मिन् मते च जाते. संसर्गत्वस्य, उक्तपरम्परासम्बन्धेनापि स्वरूपतोऽवच्छेदकत्वस्वीकारेण प्रकारविधया लाघवसंभवादिति विचारोऽयं विरमतामिति सर्वं रमणीयम् ।

Colophon :

। सिद्धान्तलक्षणटिप्पणी समाप्ता ।

R. No. 6532

सिद्धान्तलक्षणविचारः ।

SIDDHĀNTALAKṢAṆAVICĀRAḤ.

Foll. 126*a* to 130*a*. Lines 8, 10 and 11 on a page. Extent, 150 granthas.

Complete.

A critical notes on some important topics. This contains Vyāptyanugamam and some other portions.

Beginning :

गादाधर्यां सिद्धान्तलक्षणे प्रतियोगिनि साक्षाद्विशेषणस्यैव प्रतियोगितावच्छेदकत्वमिति पक्षे अवच्छेदकतायां निरवच्छिन्नत्वं प्रवेश्य दण्डिमान्-दण्डसंयोगादित्यादौ तद्दण्ड्यभावमादायाव्याप्तिः परिजह्वारः ।

End :

एकत्र द्वयमितिरीत्या एवमुभयधर्मपुरस्कारेण एकं धर्मितावच्छेदकीकृत्यापरप्रकारकव्यभिचारप्रकारकज्ञानमादाय दोषोद्धारप्रकारो भट्टाचार्यरीत्यानुसन्धेयः । मिश्रलक्षणे व्यासज्यवृत्तिधर्मावच्छिन्नत्वमित्येव पाठः ।

Foll. 128*b* and 130*b* are left blank.

R. No. 6533

Palm leaf. 16⅛ to 16⅝ × 1¼ and 1⅜ inches. Foll. 47. Lines, 5 to 8 on a page. Telugu. Extent, 1400 granthas. Good. Printed.

Purchased in 1938–39 from Uppali Iyengar of Kumbakoṇam.

मुक्तावलीव्याख्यानम्—दिनकरभट्टीयम् by महादेवः ।

MUKTĀVALĪVYĀKHYĀNAM—DINAKARABHAṬṬĪYAM by Mahādeva, son of Bālakṛṣṇa.

Same work as that described under D. No. 3955.

R. No. 6534

Palm leaf. 17 and 17¼ × 1½ inches. Foll. 60. Lines. 7 on a page. Telugu. Extent, 1,750 granths, Good.

Purchased in 1938–39 from K. R. Swami Iyengar of Kumbakonam.

परिभाषेन्दुशेखरव्याख्या त्रिपथगा by राघवेन्द्राचार्यः ।

PARIBHĀṢENDUŚEKHARAVYĀKHYĀ TRIPATHAGĀ by Rāghavendrācārya.

Foll. 5*a* to 7*a* are left blank.

Almost complete.

Same work as that described under R. No. 1996.

The Scribe adds :—

प्रजोत्पत्तौ कृष्णपक्षे श्रवणे पञ्चमीतिथौ ।
शनिवारे त्रिपथगामलिखद्रङ्गनामकः ॥

R. No. 6535

Palm leaf. 16¾ × 1⅜ and 1½ inches. Foll. 86. Lines 6, and 7 on a page. Telugu. Extent 2,500 granthas. Injured.

Purchased in 1938–39 from K. R. Swami Iyengar of Kumbakonam.

श्रीवचनभूषणमीमांसा ।

ŚRĪVACANABHŪṢAṆAMĪMĀṂSĀ.

Incomplete.

Same work as that described under D. No. 5388.

End :

न च विरुद्धविधिद्वयविरोधः निषेधवचनानां पारतन्त्र्यशेषत्वज्ञानवत् पुरुषविषयत्वात् कर्तृत्वभोक्तृत्वयोरप्रामाणिकत्वेन प्रतीयमानयोर्गुणानिष्ठता . . . . ।

R. No. 6536

Palm leaf. 15¾ × 1½ inches. Foll. 41. Lines, 8 to 11 on a page. Grantha and Tamil. Extent, 1,250 granthas. Good.

Purchased in 1938–39 from Uppali Iyengar of Kumbakonam.

श्रीवचनभूषणवाक्योत्कृष्टजन्मप्रभावप्रकाशिका ।

ŚRĪVACANABHŪṢAṆAVĀKYOTKṚṢṬAJANMAPRABHĀVA-PRAKĀŚIKĀ.

Complete.

Beginning :

सगोदभक्तोचित साक्षिकं मे स्वयं शिरस्यङ्घ्रियुगं ददाता ।
सुन्दरः सुन्दरयोगिवर्यः समास्तमस्ता जयतु क्षमायाम् ॥
स्वख्यातिलाभपूजार्थं न प्रबन्धे यतामहे ।
किन्त्वत्र स्वार्थसिद्धान्तं चिन्तये युष्मदाज्ञया ॥

किमप्यत्राभिजायन्ते என்கிற சுலோகத்தில் ... வைஷ்ணவ ... ஸாத்விகத்தை திவ்யமாக சொல்லுகிறது.

End :

तथा च यथा मोक्षत्वाभावात् त्रिवर्गस्य त्याज्यत्वं यथा च महामोक्षत्वाभावात् कैवल्यस्य त्याज्यत्वं, यथा वा सर्वप्रकारविलक्षणमहामोक्षत्वाभावात् साधनान्तरजनितसायुज्यमोक्षस्यापि त्याज्यत्वमविशिष्टमेवेत्युक्तं भवति ।

R. No. 6537.

Palm leaf. 15⅝ × 1½ and 1¾ inches. Foll. 21. Lines 10 to 12 on a page. Grantha and Tamil. Extent, 800 granthas. Good, but first leaf is torn.

Purchased in 1938–39 from Uppali Iyengar of Kumbakonam.

सारनिष्कर्षटिप्पणी by श्रीनिवासदासः

SĀRANIṢKARṢA ṬIPPAṆĪ by Śrīnivāsadāsa.

Complete.

This work purports to give the substance of Śrīvacanabhūṣaṇasāra of Veṅkaṭeśa, described under R. No. 1453*l* by Śrīnivāsadāsa of Bhūtapurī otherwise Śrīperumpudūr. It appears that this may also be called Śrīvacanabhūṣaṇamīmāṁsā bhāṣyasiddhāñjanam.

Beginning :

सारोक्तसारनिष्कर्षटिप्पणी रच्यते मया ।
वागाभरणमीमांसाभाष्यसिद्धाञ्जनात्मिका ॥

अथातस्तत्रभगवान् निगमान्तगुरुस्सारनिष्कर्षाधिकारे पूर्वाधिकारप्रकृतं रहस्यत्रयस्य सकलनिगमान्तशब्दराशिसारतमत्वं प्रतिष्ठापयितुं तस्य रहस्यत्रयव्यतिरिक्तसर्ववेदभागानामसारत्वादिसिद्ध्यधीनत्वेन प्रमाणमुखेन तदेतत्सर्वं व्यवस्थापयिष्यन् वक्ष्यमाणार्थं सङ्गृह्णाति ।

श्रुतिपथविपरीतं क्ष्वेलकल्पं श्रुतौ च
प्रकृतिपुरुषभोगप्रापकांशो न पथ्यः ।
तदिह विबुधगुप्तं मृत्युभीता विचिन्व-
न्त्युपनिषदमृताब्धेरुत्तमं सारमार्याः ॥

अत्रायं वक्ष्यमाणसङ्ग्रहः :—

End :

एवं रहस्यत्रयस्य भजनयितापयोजकं सारतमत्वं साधितम् । अथ ततस्तदुपादेयतां निगमयति .... इत्यादिना स्पष्टोऽर्थ इति सर्वमवदातम् ।

Colophon :

श्रीश्रीनिवासदासेन श्रीभूतपुरवासिना ।
रचिता वर्धतामेषा सारनिष्कर्षटिप्पणी ॥

R. No. 6538.

Palm leaf. 5¼ × 1½ inches. Foll. 64. Lines, 7 on a page. Grantha. Injured.

Purchased in 1938–39 from Śrī Cakravarti Jāgannāthācāriār of Kumbakoṇam.

न्यायसिद्धान्तमञ्जरीदीपिका—तर्कप्रकाशिका by श्रीकण्ठशर्मा ।

NYĀYASIDDHĀNTAMAÑJARĪDĪPIKĀ—TARKAPRAKĀŚIKĀ by Śrīkaṇṭhaśarman.

Contains Pratyakṣapariccheda complete.

Same work as that described under D. No. 4223.

The scribe adds :—

॥ श्रीपुरन्दान् रामानुजाचार्येन् स्वहस्तलिखितम् ॥

R. No. 6539.

Palm leaf. 17¼ and 17⅝ × 1¾ inches. Foll. 138. Lines, 6 on a page. Grantha. Extent, 5,000. Much injured.

Purchased in 1938–39 from Chakravartijagannāthacāriar of Kumbakonam.

सामान्यनिरुक्तिव्याख्या by कृष्णभट्टः ।

